# 9 महामना मालवीयः

महामनस्विनः मदनमोहनमालवीयस्य जन्म प्रयागे प्रतिष्ठितपरिवारेऽभवत्। अस्य पिता पण्डितव्रजनाथमालवीयः संस्कृतस्य सम्मान्यः विद्वान् आसीत्। अयं प्रयागे एव संस्कृतपाठशालायाम् राजकीयविद्यालये म्योरसेण्ट्रल महाविद्यालये च शिक्षां प्राप्य अत्रैव राजकीय विद्यालये अध्यापनम् आरब्धवान्। युवकः मालवीयः स्वकीयेन प्रभावपूर्णभाषणेन जनानां मनांसि अमोहयत्। अतः अस्य सुहृदः तं प्राड्विवाकपदवीं प्राप्य देशस्य श्रेष्ठतरां सेवां कर्तुं प्रेरितवन्तः। तदनुसारम् अयं विधिपरीक्षामुत्तीर्य प्रयागस्थे उच्चन्यायालये प्राड्विवाककर्म कर्तुमारभत। विधेः प्रकृष्टज्ञानेन मधुरालापेन उदारव्यवहारेण चायं शीघ्रमेव मित्राणां न्यायाधीशानाञ्च सम्मानभाजनमभवत्।

महापुरुषाः लौकिक-प्रलोभनेषु बद्धाः नियतलक्ष्यान्न कदापि भ्रश्यन्ति। देशसेवानुरक्तोऽयं युवा उच्चन्यायालस्य परिधौ स्थातुं नाशक्नोत्। पण्डित मोतीलालनेहरू लालालाजपतरायप्रभृतिभिः अन्यैः राष्ट्रनायकैः सह सोऽपि देशस्य स्वतन्त्रतासंग्रामेऽवतीर्णः। देहल्यां त्रयोविंशतितमे कांग्रेसस्याधिवेशनेऽयम् अध्यक्षपदमलङ्कृतवान्। 'रोलट एक्ट' इत्याख्यस्य विरोधेऽस्य ओजस्विभाषणं श्रुत्वा आङ्ग्लशासकाः भीताः जाताः। बहुवारं कारागारे निक्षिप्तोऽपि अयं वीरः देशसेवाव्रतं नात्यजत्।

हिन्दी-संस्कृताङ्ग्लभाषासु अस्य समानः अधिकारः आसीत्। हिन्दी-हिन्दुहिन्दुस्थानानामुत्थानाय अयं निरन्तर प्रयत्नमकरोत्। शिक्षयैव देशे समाजे च नवीनः प्रकाशः उदेति अतः श्रीमालवीयः वाराणस्यां काशीविश्वविद्यालयस्य संस्थापनमकरोत्। अस्य निर्माणाय अयं जनान् धनम् अयाचत जनाश्च महत्यस्मिन् ज्ञानयज्ञे प्रभूतं धनमस्मै प्रायच्छन्, तेन निर्मितोऽयं विशालः विश्वविद्यालयः भारतीयानां दानशीलतायाः श्रीमालवीयस्य यशसः च प्रतिमूर्तिरिव विभाति। साधारणस्थितिकोऽपि जनः महतोत्साहेन मनस्वितया पौरुषेण च असाधारणमपि कार्यं कर्तुंक्षमः इत्युदर्शयत् मनीषिमूर्धन्यः मालवीयः। एतदर्थमेव जनास्तं महामना इत्युपाधिना अभिधातुमारब्धवन्तः।

महामना विद्वान् वक्ता धार्मिको नेता, पटुः पत्रकारश्चासीत्। परमस्य सर्वोच्चगुणः जनसेवैव आसीत्। यत्र कुत्रापि अयं जनान् दुःखितान् पीड्यमानांश्चापश्यत् तत्रैव सः शीघ्रमेव उपस्थितः सर्वविधं साहाय्यञ्च अकरोत्। प्राणिसेवा अस्य स्वभाव एवासीत्।

अद्यास्माकं मध्येऽनुपस्थितोऽपि महामना मालवीयः स्वयशसोऽमूर्तरूपेण प्रकाशं वितरन् अन्धे तमसि निमग्नान् जनान् सन्मार्गं दर्शयन् स्थाने स्थाने, जने जने उपस्थित एव।

**जयन्ति ते महाभागा जन-सेवा-परायणाः।**
**जरामृत्युभयं नास्ति येषां कीर्तितनोःक्वचित्।।**

# अभ्यास प्रश्न

## लघु उत्तरीय प्रश्न

१. मदनमोहनमालवीयस्य जन्म कुत्र अभवत्? [2016 SI, SJ]
२. श्रीमालवीयस्य पितुः किं नाम आसीत्? [2019 CO]
अथवा महामना मालवीयस्य कस्य पुत्रः आसीत्? [2020 ZD]
३. मालवीयमहोदयस्य प्रारम्भिकी शिक्षा कुत्र अभवत्?
४. श्री मालवीयः कस्य विश्वविद्यालयस्य स्थापनम् अकरोत्?
५. श्री मालवीयः काशीविश्वविद्यालयस्य संस्थापनम् कुत्र अकरोत्? [2016 SM, SN, 19 CM]
६. हिन्दूविश्वविद्यालयस्य संस्थापकः कः आसीत्?
७. श्रीमालवीयस्य चरित्रे कः सर्वोच्चगुणः आसीत्? [2017 MM]
८. युवकः मालवीयः कथं जनानां मनांसि अमोहयत्?
९. श्रीमालवीयस्य गुणान् वर्णयन्तु?
१०. मालवीयः कुत्र प्राड्विवाककर्म कर्तुमारभत् ?
११. शिक्षायाः क्षेत्रे श्रीमालवीयः किमकरोत्?
१२. मदनमोहनमालवीयस्य कासु भाषासु समानः अधिकारः आसीत्?

## अनुवादात्मक प्रश्न

१. **निम्नलिखित अवतरणों का ससन्दर्भ हिन्दी-अनुवाद कीजिए—**

(क) महापुरुषाः ................................................. नात्यजत्। [2016 SI, SM, 20 ZA, ZC, ZD]
(ख) हिन्दी .......................................................... विभाति। [2019 AL, 20 ZB]
(ग) अस्य निर्माणाय......................... मनीषिमूर्धन्यः मालवीयः।
अथवा अस्य निर्माणाय.................................. पत्रकारश्चासीत्। [2019 CN]
अथवा अस्य निर्माणाय............................. प्रतिमूर्तिरिव विभाति।
(घ) महामना ...................................................... एवासीत्।
(ङ) महामना विद्वान् ..................................... उपस्थित एव।
अथवा महामना विद्वान् ........................................... एवासीत्।
(च) महामनस्विनः ............................................. अमोहयत्। [सा०2020 ZI]
(छ) अस्य पिता ................................................ कर्तुमारभत्। [2017 MI, सा०2020 ZM]
(ज) अयं प्रयागे .................................. सम्मानभाजनमभवत्।
अथवा अयं प्रयागे .............................................. कर्तुमारभत्।
(झ) शिक्षयैव देशे ............................................ मालवीयः।
अथवा शिक्षयैव ................................................... विभाति।
(ञ) जयन्ति ते महाभागाः ...................................... क्वचित्।
(ट) युवकः मालवीयः ..........................सम्मान भाजनम भवत्। [2020 ZF]

(ठ) हिन्दी संस्कृताङ्ग्लभाषासु.................. अभिधातुमारब्धवन्तः।
अथवा हिन्दी संस्कृताङ्ग्लभाषासु.................. प्रतिमूर्तिरिव विभाति।
अथवा हिन्दी संस्कृताङ्ग्लभाषासु.................... धनमस्मै प्रायच्छन्।

२. **निम्नलिखित सूक्तिपरक पंक्तियों की ससन्दर्भ हिन्दी-व्याख्या कीजिए–**
(क) "महापुरुषाः लौकिक-प्रलोभनेषु बद्धाः नियतलक्ष्यान्न कदापि भ्रश्यन्ति।"
(ख) जयन्ति ते महाभागा जन-सेवा-परायणाः।
(ग) जरामृत्युभयं नास्ति येषां कीर्तितनोः क्वचित्।

३. **निम्नलिखित वाक्यों का संस्कृत में अनुवाद कीजिए–**
(क) मालवीय जी एक श्रेष्ठ वक्ता थे।
(ख) वे बड़े दयालु थे।
(ग) वे सदैव पीड़ितों की सहायता करते थे।
(घ) उन्होंने काशी विश्वविद्यालय की स्थापना की।
(ङ) वे आज भी हमारे समक्ष प्रकाश-स्तम्भ की भाँति हैं।

## व्याकरणात्मक प्रश्न

१. **निम्नलिखित शब्दों में सन्धि-विच्छेद कीजिए–** अत्रैव, चायम्, सोऽपि, इत्याख्यस्य, धर्मऽस्य।
२. **निम्नलिखित में विभक्ति एवं वचन बताइए–** विद्वान्, विधेः, परिधौ, उत्थानाय, अस्मिन्।
३. **निम्नलिखित में प्रकृति तथा प्रत्यय बताइए–** प्राप्य, कर्तुम्, जाताः।

## शब्दार्थ

**प्राड्विवाक** = वकील। **नियतलक्ष्यान्न** = (नियत-लक्ष्यात् + न) नियत (निश्चित) लक्ष्य से नहीं। **भ्रश्यन्ति** = विचलित होते हैं। **देशसेवानुरक्तोऽयम्** (देशसेवा + अनुरक्तः + अयम्) देशसेवा में अनुरक्त यह। **परिधौ** = सीमा में। **प्रभूतम्** = बहुत। **प्रायच्छन्** = दिया। **अन्धेतमसिर**= घने अन्धकार में। **जरा** = बुढ़ापा। **पटुः** = निपुण। **अभिधातुमारब्धवन्तः** = सम्बोधित करना प्रारम्भ कर दिया। **जरामृत्युभयम्** = वृद्धावस्था और मृत्यु का भय।